11.09.20
2

शुक्र पापफलद है। मंगल तथा सूर्य शुभ हैं। सूर्य और बुध राजयोग कारक होते हैं। शनि मारक नहीं होता। शुक्र आदि पापफलद मारकता से युक्त होने से मारक होते हैं।

मकरलग्नोद्भवजातानां मारकादि विचारमाह—

कुजजीवेन्दव: पापा: शुभौ भार्गव चन्द्रजौ।
स्वयं हेव न हन्ता स्यान्मन्दो भौमादय: परे॥
तल्लक्षण निहन्तार: कविरेक: सुयोगकृत्।
ज्ञातव्यानि फलान्येवं बुधैश्च मृगजन्मन:॥

अन्वय: — मकरलग्नभवानां जातानां कुज-जीव-इन्दव: पापा: सन्ति भार्गव-चन्द्रजौ शुभौ स्त:। तत्र मन्द: स्वयं एव न हन्ता भवति च परे भौमादय: तत् लक्षण (मारक लक्षणा:) निहन्तार: भवन्ति। एक: एव कवि सुयोगकृत् सम्भवति। एवं मृगजन्मन: फलानि बुधैश्च ज्ञातव्यानि सन्ति।

क्षेमङ्करी — मकर लग्न में जन्म लेने वालों का मंगल, गुरु और चन्द्रमा पाप ग्रह हैं। शुक्र और बुध शुभ हैं। शनि स्वयं मारक नहीं होता। अन्य भौमादि पाप ग्रह तल्लक्षण (मारक के लक्षण युक्त) होने से मारक होते हैं। अकेला एक शुक्र योगकारक होता है।

डॉ० सुरेश्वर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुरखसेना,
पूर्णियाँ।

उपशास्त्री 11.09.20
1

वृश्चिकलग्नोद्भवजातानां मारकादिविचारमाह —

सौम्यभौमसिताः पापाः शुभौ गुरुनिशाकरौ।
सूर्य-चन्द्रमसावेव भवेतां योगकारकौ॥
जीवो न हन्ता सौम्याद्याः परे मारकलक्षणाः।
तत्तत्फलानि विज्ञेयान्येवं वृश्चिकजन्मनः॥

अन्वयः — अथ वृश्चिकलग्ने उत्पन्नानां जातानां सौम्य-भौम-सिताः पापाः सन्ति। गुरु-निशाकरौ शुभौ भवतः। तत्र सूर्य-चन्द्रमसौ एव योगकारकौ भवेताम्। अस्मिन् स्थितौ जीवो न हन्ता भवति। तत्र अन्याः सौम्यादि पापग्रहाः मारकलक्षणलक्षितो भवन्ति। एवं वृश्चिकजन्मनः जातानां तत्तत्फलानि विज्ञेयाः।

क्षेमङ्करी — वृश्चिक लग्न में जन्मे जातकों के लिए बुध, मंगल और शुक्र पाप ग्रह हैं, बृहस्पति और चन्द्रमा शुभ ग्रह हैं। तथा सूर्य व चन्द्रमा राजयोग कारक होते हैं। शुभ होने से गुरु मारक नहीं होता, दूसरे सौम्यादि पापग्रह मारक लक्षण युक्त होते हैं।

धनुलग्नोद्भवजातानां मारकादिविचारमाह —

एक एव कविः पापः शुभौ भौमदिवाकरौ।
योगौ भास्करसौम्याभ्यां न तु हन्तांशुमान्सुतः॥
घ्नन्ति शुक्रादयः पापा मारकत्वेन लक्षिताः।
ज्ञातव्यानि फलान्येवं धनुषश्च मनीषिभिः॥

अन्वयः — धनुलग्नजातानां एक एव कविः पापः ग्रहः अस्ति। भौम दिवाकरौ तु शुभौ स्तः। तत्र भास्कर सौम्याभ्यां राजयोगकारकौ भवतः। अंशुमान् सुतः (शनिः) हन्ता तु न भवति। तत्रैव शुक्रादयः पापाः मारकत्वेन लक्षिताः सन्ति, तेन ते घ्नन्ति। एवं धनुषश्च फलानि मनीषिभिः ज्ञातव्यानि सन्ति।

क्षेमङ्करी — धनु लग्न वालों के लिए केवल एक

P.T.O

लग्नस्थितानां सर्वग्रहाणां फलान्याह—

मूर्तौ करोति दिनकृद्विधवां कुजश्च
राहुर्विपन्नतनयां रविजो दरिद्राम्।
शुक्रः शशाङ्कतनयश्च गुरुश्च
साध्वीमायुःक्षयं प्रकुरुतेऽथ विभावरीशः॥

यदि विवाहकालिक लग्न में सूर्य या मंगल बैठा हो तो विधवा, राहु हो तो नष्ट सन्तान वाली, शनि हो तो दरिद्र, शुक्र, बुध या गुरु बैठा हो तो साध्वी और चन्द्र हो तो नष्ट आयुवाली स्त्री होती है।

दिनकृदादित्यो मूर्तौ वैवाहिके लग्ने स्थितो विधवां मृतभर्तृकां कन्यकां करोति। कुजोऽङ्गारकश्चशब्दाद्विधवामेव करोति। राहुः सैंहिकेयो विपन्नतनयां मृतपुत्रां करोति। रविजो दरिद्रां निर्धनाम्। शुक्रो भार्गवः। शशाङ्कतनयो बुधः। गुरुश्च जीवः। एते साध्वीं सच्छीलां कुर्वन्ति। विभावरी रात्रिः। तस्या ईशश्चन्द्रः। आयुषो जीवितस्य क्षयं विनाशं प्रकुरुते।

द्वितीयस्थानस्थितानां सर्वग्रहाणां फलान्याह—

कुर्वन्ति भास्करशनैश्चरराहुभौमा
दारिद्र्यदुःखमतुलं नियतं द्वितीये।
वित्तेश्वरीमविधवां गुरुशुक्रसौम्या
नारीं प्रभूततनयां कुरुते शशाङ्कः॥

यदि विवाहकाल में लग्न से द्वितीय भाव में सूर्य, शनि, राहु या मंगल बैठा हो तो सदा अतिशय दरिद्रय-दुःख से युतः, गुरु, शुक्र या बुध हो तो धनवती, वैधव्यरहित तथा चन्द्र हो तो अधिक सन्तान वाली स्त्री होती है।

P.T.O

द्वितीये लग्नाद् द्वितीयस्थाने। भास्कर आदित्यः। शनैश्चरः सौरिः। राहु सैंहिकेयः। भौमोऽङ्गारकः। अतुलमक्षमं दारिद्र्यं दुःखं विगतधनेन क्लेशं नियतं सर्वकालं कुर्वन्ति। गुरुर्बृहस्पतिः। शुक्रः। सौम्यो बुधः। वित्तेश्वरीं धनस्य स्वामिनीम् अविधवां जीवद्भर्तृकां च कुर्वन्ति। शशाङ्कश्चन्द्रः। नारीं कन्यां प्रसूततनयां बहुप्रजां कुरुते।

तृतीयस्थानस्थितानां सर्वग्रहाणां फलान्याह —

सूर्येन्दुभौमगुरुशुक्रबुधास्तृतीये
कुर्युः सदा बहुसुतां धनभागिनीं च।
व्यक्तां दिवाकरसुतः सुभगां करोति।
मृत्युं ददाति नियमात् खलु सैंहिकेयः॥

यदि विवाहकाल में लग्न से तृतीय भाव में सूर्य, चन्द्र, मंगल, गुरु, शुक्र या बुध हो तो अधिक सन्तान वाली और धन से युत, शनि हो तो कीर्ति से युत और सुभगा तथा राहु हो तो निश्चय ही मृत्यु को प्राप्त करने वाली स्त्री होती है।

तृतीये तृतीयस्थाने स्थिताः। सूर्य आदित्यः। इन्दुश्चन्द्रः। भौमोऽङ्गारकः। गुरुर्जीवः। शुक्रः। बुधः। एते सदा सर्वदा बहुसुतां प्रसूतपुत्राम्, धनभागिनीं च वित्तान्वितां कन्यकां कुर्युः। दिवाकरसुतः सौरिः। व्यक्तां कीर्तियुक्ताम्। सुभगां भर्तृवल्लभां च करोति। सैंहिकेयो राहुः, नियमान्निश्चयान्मृत्युं मरणं ददाति। खलु शब्दश्चार्थे वाक्यालङ्कारे वा।

डॉ० सुदिवट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।